Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 3 | ISSN : 2582-0095

# पण्डितताराचरणभट्टाचार्यविरचितस्य भारतवसुन्धरासान्त्वनगीतिकाव्यस्य सामाजिकं समीक्षणम्

**राहुलमण्डल:**

**शोधच्छात्र:, साहित्यविभाग:, राष्ट्रियसंस्कृतविश्वविद्यालय:,तिरुपति:**

**Article Info**
Volume 4 Issue 3
Page Number : 77-80

**Publication Issue :**
May-June-2021

**Article History**
Accepted : 20 June 2021
Published : 30 June 2021

**सारांश:** - समधर्मणां मानावानां समूह: समाजो भवति। मनुष्य: सर्वथा सामाजिको भवति। समाजं विना मानवसभ्यताया: विकास: नैव सम्भवति। यस्य राष्ट्रस्य सामाजिकं जीवनं यथा समुन्नतं भवति, तद्राष्ट्रं तदनुसारं प्रगतिपथमवतरति। अत: समाजशास्त्रिण: सर्वथा समाजस्य हिताय सन्मार्गदर्शनं कुर्वन्ति। कविपण्डिताश्च स्वीयरचनासु सामाजिकजीवनस्य समुन्नतये प्रवर्तयन्ति। तस्मात् साहित्यं सर्वथा अस्माकं समाजस्य दर्पणमिति कथ्यते। सहितानां शास्त्राणां समन्वय: साहित्ये दृश्यते। गीतिकाव्ये अपि सामाजिकार्थिकराजनीतिशास्त्राणामपि समन्वयो: भवतीति सारभूतं तत्त्वं भारतवसुन्धरासान्त्वनम् इति गीतिकाव्ये समग्रतया स्पष्टं भवति। अत: मया अत्र अस्मिन् गीतिकाव्ये विद्यमानं समाजतत्त्वं संक्षेपेण विलिख्यते।

**विशेषशब्दा:** – राष्ट्रभक्ति:, समाजस्य ऐतिह्यम्, गुरो: उपदेश:, वसुधैव कुटुम्बकम्, अहिंसा परमो धर्म:, देवपूजासंस्कृति:, निर्माणकला इत्यादय:।

अद्यावधि संस्कृतसाहित्ये विरचितेषु काव्येषु कालानुरोधेन वयं सामाजिकं चित्रमवश्यं द्रष्टुं पारयाम:। यतोहि काव्यं सर्वथा लोकव्यवहारज्ञानाय भवति। किञ्च **"लोकोपदेशजननं नाटयमेतद् भविष्यतीति"** [1] भरतवचनादपि ज्ञायते यत् काव्यनाटकादीनि समाजसंस्काराय लोकोपदेशजननानि भवन्त्येव।

कवे: ताराचरणभट्टाचार्यमहोदयस्य एकमेव गीतिकाव्यमिदं 'भारतवसुन्धरासान्त्वनम्' अथवा 'भारतगीतिका' इति प्रसिद्धम्। अस्य काव्यस्य रचनार्थं प्रेरणा तेन बङ्ग-भङ्गविरुद्धे प्रवर्तिते राष्ट्रियान्दोलनसमये सम्प्राप्ता तदानीन्तनकवय: नागरिकेषु राष्ट्रप्रेमजागरणार्थं विविधैरुपायै: प्रयत्नं कृतवन्त:। राष्ट्रभक्तिमयानि गीतानि विरचितानि।

तत्र वङ्किमचन्द्रचट्टोपाध्यायमहोदयेन संस्कृतनिष्ठबङ्गभाषया लिखितं 'वन्दे मातरम्' इति राष्ट्रभक्तिगीतं भारतवर्षे सर्वत्र प्रचारितम्। हिन्दीभाषया मैथिलीशरणगुप्तेन रचितं 'भारतभारती' काव्यमपि राष्ट्रभक्तिसम्प्रेरकमभवत्। एवमेव बहूनां कवीनां विविधभाषासमलंकृतै: राष्ट्रभक्तिकाव्यै: प्रभावित: कविपण्डित: श्रीताराचरणभट्टाचार्य: 167 पद्यै: विरचितं स्वीयं काव्यसंग्रहं 'भारतगीतिका' इति नाम्ना प्रस्तुतवान्। परन्तु विद्वद्भि: सह विचार्य 'भारतवसुन्धरासान्त्वनम्' इति नामकरणमकरोत्।

1. **नाट्यशास्त्रम्-1/115**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

अत्र भारतवसुन्धरायाः भौतिकं तथा आध्यात्मिकं सौन्दर्यं वर्णितमस्ति। सूक्ष्मैक्षिकया परिशीलनेनात्र भारतीयं सांस्कृतिकं सामाजिकं च वैभवं पाठकानां कृते प्रदत्तमस्तीति प्रतिभाति।

**भारतभूमिः देवभूमिः** - कवे भावनया भारतवसुन्धरा देवभूमिरिति प्रतीयते। विश्वभुवनवन्दितायाः भारतभूमेः हीरकमुकुट इव हिमालयः शोभते। भारतमहासागरः तुङ्गोज्ज्वलवीचिभिस्तदीयं चरणाम्बुजं चुम्बति। समुद्रमन्थनवृत्तान्तवर्णनेन देवभोग्यानामृतादीनामुद्भवस्थलं भारतवर्षमिति ध्वन्यते। नद-नदी-पर्वत-कानन-लता-कुसुम-राजिभिर्विराजिता भारतवसुन्धरा वसुधैव कुटुम्बकमिति वार्ता प्रसारयति।

महर्षिः वाल्मीकिः भगवतः मर्यादापुरुषोत्तमस्य श्रीरामचन्द्रस्य पुण्यकथां वर्णयन् **'रामादिवत् वर्तितव्यम् न तु रावणादिवत्'**[2] इत्यादि काव्योपदेशप्रदानद्वारा समाजे रामराज्यप्रतिष्ठायाः सङ्केतं करोति।

रामचरितगीतपीयुषतरङ्गिणी सम्प्रत्यपि विश्वं पवित्रीकरोतीति कविः संसूचयति। एवमेव भगवतः श्रीकृष्णचन्द्रस्य चारुचरित्रचित्रणेन सामाजिकीं समरसतां प्रतिपादयितुं कविः प्रयतते।

महर्षेः बादरायणस्य वैदुष्यवर्णनेन –

**अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।**
**परोपकारः पुण्याय पापाय परपीडनम्।।**[3]

इति वार्त्ता प्रसारिता। अर्जुनं प्रति गीतोपदेशदानेन सामाजिकी वार्ता प्रसारिता। पितुः कृते पुत्रस्य भीष्मस्य त्यागः कविना लिखितः। यथा –

**वासुदेवमपि विशिखं योऽधारयदारान्**
**नो दधार पितुरपि यः प्रीणनाय दारान् ।**
**शरशतमुखशयितोऽपि च विपुलान् पृथगभिधान्**
**धर्मान् किल धर्मसूनुमुपदिदेश विविधान् ।।**[4]

भारतवर्षस्य सामाजिकजीवने सूत्रकाराणां महर्षिणां योगदानमतुलनीयं वर्तते। तैः प्रतिपादितानि शास्त्राणि सर्वदा जनान् सन्मार्गे प्रवर्त्तयन्ति। महाकवेः कालिदासस्य कविताकौशलवर्णनप्रसङ्गेऽपि समाजे दाम्पत्यप्रेमणः पराकाष्ठा यक्षमुखेन प्रतिपादिता।

समुद्रगुप्तप्रभृतीनां शासकानां स्मरणेन कविः भारतवसुन्धरायाः ऐतिहासिकं सांस्कृतिकं च महत्वं प्रकटीकृतवान् इति प्रतिभाति। भोजराजस्य दानशीलता सामाजिकमूल्यबोधं बोधयति। विविधपौराणिकसन्दर्भकथनपुरःसरं कविः दानपरायणानां महापुरुषाणां प्रसङ्गमवतारयति।

---

2. **काव्यप्रकाशः, प्र. उ, पृ-6**

3. ***सुभाषितसंग्रहः -4***

4. **भारतवसुन्धरासान्त्वनम्. श्लोक-2**

भगवत: गौतमबुद्धस्य चरितवर्णनेन समाजे 'अहिंसा परमो धर्म:' इति वार्त्ता प्रसारिता। किञ्च 'कामनाया: विनाशे दु:खस्य विनाश:' इति जीवनरहस्यं समाजे प्रचारितम्। महाराजस्य अशोकस्य स्मरणेन प्रजारञ्जनानुकूलं सामाजिकं कार्यं राज्ञ: परमं कर्तव्यमिति वार्त्ता स्वत: प्रसार्यते। विक्रमादित्यस्य वर्णनेन उज्जयिन्या: गौरवमपि सूचितमस्ति। बङ्गदेशशासकानां सेनवंशीयानां महिमावर्णनेन कवि: स्वमातृभूमे: गौरवं प्रकटयितुं नैव विस्मरति। तदानीन्तनकवीनां कृतिषु सामाजिकी चेतना सर्वथा परिपूर्णेति कवेरभिप्राय:।

तदानीं बङ्गदेशे यवनाक्रमणादिघटनावर्णनेन सामाजिकं चित्रमपि काव्येऽस्मिन् प्रतिफलितं भवति। पृथ्विराजस्य प्रताप:, शिवाजीमहाराजस्य विजयगाथा, विविधविदुषां पाण्डित्यम्, विविधविद्वानां भारतवर्षे महत्त्वम्, विविधस्थापत्यादिकलासम्पत्तिवर्णनद्वारा सामाजिकं चित्रं समाकलयितुं शक्यते।

समाजे देवपूजाया: मन्दिरनिर्माणसंस्कृतेश्च महत्त्वमपि सूचितम् । यथा –

**उत्कलभुवि कलिङ्गेषु दक्षिणदिशि बहुधा**
**कति हरिहरगौरीरविमठा: सन्ति किं मुधा ?**
**कति शरदोऽतीत्य ते तु तव वक्षसि संस्थिता:**
**युरोपनिवासिनोऽपि वीक्ष्य सन्ति विस्मिता:।।**[5]
**गिरिकृत्रिमकन्दरेषु मन्दिराणि सुन्दरा-**
**ण्यन्धकारमुक्तानि च भान्ति सन्ति कन्धरा:।**
**कान्तिमन्ति चित्राणि च सूक्ष्माणि च लसन्ति**
**के नु वीक्ष्य तानि तानि नासीदिति वदन्ति ।।**[6]

समाजे मूर्तिनिर्माणकलाया: सूचना यथा –

**मृन्मयीभिरुपलचारुदारुज्ज्वलमूर्तिभि:**
**धातुघटितमूर्तिभिश्च मुखनयनस्फूर्त्तिभि:।**
**प्राचामपि नवानाञ्च निर्मिताभिराभि:**
**क्षोदिताभिरपि धरणिर्व्याप्ता तव मा भी:।।**[7]
**दृषदिष्टककाष्ठेषु च विविधधातुपात्रे**
**स्वर्णरजतलेप: किल विमलसौधगात्रे ।**
**तवाद्यापि दीयतेऽत्र शिल्पिभिरपि सूनुभि:**
**तानि जननि दृश्यन्ते प्रोज्ज्वलन्ति भानुभि: ।।**[8]

---

5. भा. सा. श्लो. - 150
6. भा. सा. श्लो. - 151
7. भा. सा. श्लो. - 156
8. भा. सा. श्लो. - 157

बाङ्ग्लादेशस्य ढाकानगरे निर्मितवस्त्राणां, काशीनगर्याः व्यजनानि, पट्टवस्त्राणि, स्वर्णसूत्ररचितवस्त्राणि, काश्मीरदेशनिर्मितानि शीतवस्त्राणि च वर्णयन् कविः भारतवर्षस्य सामाजिकप्रगतेः सूचनां कृतवान्।

काव्योपसंहारे गोब्राह्मणरक्षणाय संसारे भगवतः अवतारः इति सूचयन् महतीं सामाजिकीं चेतनां प्रचारयति। यथा –

**गोब्राह्मणरक्षणाय भगवानवततार**

**ध्रियते ते ध्रुवमनेन नियतं गुरुभारः।**

**प्रवेशस्य जलधिस्त्वयि विस्तृतमपि द्वारं**

**तमवलोक्य सर्वेषामबाधजलविहारम्।।**[9]

किञ्च काव्यान्ते भारतधरणी बहुविधविभवैरभिनन्दिता स्वसन्तानैश वन्दिता सती दुःखानुभवं नैव कुर्यादिति बोधयन् कविः पुत्रस्य मातुः कृते सान्त्वनमिति सामाजिकीं वार्त्तामपि प्रयच्छतीत्यलं पल्लवित्तेन। तद्यथा –

**त्रिदशकोटिनन्दनैः सुवन्दिताभिनन्दिता**

**नन्दनवनमन्दारैरर्चिताऽस्थनिन्दिता ।**

**एतावति विभवे सति किं पुनर्नु खिद्यसे**

**भुवनेश्वरि ! जगतामवि शिरसि धरणि ! विद्यसे ।।**[10]

अत्र भारतवसुन्धरायाः भौतिकं तथा आध्यात्मिकं सौन्दर्यं वर्णितमस्ति। सूक्ष्मैक्षिकया परिशीलनेनात्र भारतीयं सांस्कृतिकं सामाजिकं च वैभवं पाठकानां कृते प्रदत्तमस्तीति प्रतिभाति। सर्वेषां हृदये राष्ट्रभक्तिः राष्ट्रप्रीतिश्च उदेति। वयं भारतीयाः एकं भारतं श्रेष्ठभारतमिति आह्वानमस्ति। अतः वयम् एतस्य काव्यस्य अध्ययनद्वारा अस्माकं सामाजिकमानसिकीं शक्तिं वर्धयामः। भारतं विशालराष्ट्रम् अत्र विभिन्नाः भाषाः सन्ति। किन्तु अस्माकं लक्ष्यम् एकम्। अस्माकं तत्र भारतीयानां जीवनम् उन्नतमस्ति, इति कविः सान्त्वनां प्रददाति भारतमातुः प्रति। इयं भूमिः देवभूमिः अस्ति। अतः राष्ट्रभावना जागरिता भवति। अस्य काव्यस्य पठनेन वयं संस्कृतभारतं समर्थभारतम् इत्यस्य परिकल्पनां कर्तुं शक्नुमः। महापुरुषाणां जीवनचरितस्य अध्ययनेन वयं स्वच्छभारतस्य परिकल्पना कर्तु शक्नुमः। सर्वे आदर्शमहापुरुषाणां जीवनचरितं कविना वर्णितम्। वयमपि उत्तमाः नागरिकाः भविष्यामः। राष्ट्रस्य हितं करिष्यामः इति बहुविधलाभाः सन्ति। एवञ्च गवेषकाणां कृतेऽपि समकालिकसाहित्यसमीक्षणार्थमपि उपादेया तथ्यानि सन्ति। कवयः एवं रूपेण आधुनिकानि काव्यानि अपि रचयन्तीति समकालिकरचनाक्षेत्रेऽपि अस्य काव्यस्य मार्गदर्शनं कुर्वन्ति।

**सहायकग्रन्थसूची –**

1. काव्यप्रकाशः – मम्मटाचार्यः, विमलाकान्तमुखोपाध्यायः (व्याख्याकारः., प्रथमप्रकाशः, कोलकाता, संस्कृतपुस्तकभाण्डारः, 1417।
2. नाट्यशास्त्रम् – भरतमुनिः, डॉ. हरिश्चन्द्रमणित्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,वाराणसी, 1992।
3. भारतवसुन्धरासान्त्वनम् – श्रीताराचरणभट्टाचार्यः, सं. प्रो. शिवरामशर्मा, शारदा संस्कृत संस्थान, वाराणसी, 2017।
4 . महाभारतम् – व्यासमहर्षि , निर्णयसागर प्रकाशक, मुम्बई, 1992।
5 . संस्कृतसाहित्येतिहासः – कृष्णदास अकादेमी वाराणसी, 1999।
6. संस्कृतनिबन्धसंग्रहः – डॉ. पूर्णिमा आचार्या, चौखम्बा संस्कृत भवन, वाराणसी, 2017।
7. संस्कत लोकोक्ति कोश – डॉ. प्रीतिप्रभा गोयेल, राजस्थानी ग्रन्थागार, जोधपुर, प्रथमसंस्करण – 2011।

---

**9. भा. सा. श्लो. - 161**

**10. भा. सा. श्लो. - 167**